# संस्कृतवार्ताः

**दिनाङ्कः-15.11.2025** **प्रातः - 06:55**

## बिहार-विधानसभायाः

बिहार-विधानसभायाः निर्वाचने त्रिचत्वारिंशोत्तर द्विशतासनानां सभायां द्वयाधिक द्विशतासनानि जित्वा, एन.डी.ए. इति सत्तारूढ-राष्ट्रिय-लोकतान्त्रिक-सङ्घटनेन बहुमतं प्राप्तम्। निर्वाचन-आयोगेन गतरात्रौ सर्वेषां निर्वाचनक्षेत्राणां परिणामानां घोषणा कृता। राज्ये सर्वकारस्य निर्माणं कर्तुं कस्यापि दलं सङ्घटनं वा केवलं द्वाविंशत्यधिकैकशतासनानि आवश्यकानि भवन्ति। भाजपेति दलं ऊननवति आसनानि जित्वा बृहत्तमदलत्वेन उद्भूतः। अस्य मित्रदलं मुख्यमन्त्रिणः नितीश कुमारस्य नेतृत्वे जनतादल (युनाइटेड्) दलं पञ्चाशीति आसनानि प्राप्तं, केन्द्रीयमन्त्रिणः चिराग पासवानस्य नेतृत्वे लोकजनशक्ति(राम् विलास्) दलं ऊनविंशति आसनानि प्राप्तम्। पूर्वमुख्यमन्त्रिणः जितनराम् माञ्झी इत्यस्य नेतृत्वे हिन्दुस्तानी-आवाम्-मोर्चा (सेकुलर्) दलं पञ्च आसनानि, उपेन्द्र-कुशवाहा इत्यस्य नेतृत्वे राष्ट्रियलोक-मोर्चा दलं च चत्वारी आसनानि विजिते। आर्.जे.डी. दलस्य नेतृत्वे महगठबन्धनेन केवलं पञ्चत्रिंशत् आसनानि एव विजितम्। आर्.जे.डी. इति राष्ट्रिय-जनता-दलेन पञ्चविंशति आसनानि, काङ्ग्रेस्-दलेन षट् आसनानि, भारतीयसाम्यवादि (मार्क्सिस्ट्-लेनिनिस्ट्) लिबरेशन् दलेन द्वे आसने, सी.पी.आई. (एम्.) तथा भारतीय-समावेशक- दलेन च एकैकं आसनं विजितम्। हैदराबाद्-नगरस्य सांसदः असदुद्दीन् ओवैसी इत्यस्य नेतृत्वे ए.आई.एम्.आई.एम्. दलेन पञ्च आसनानि प्राप्तानि, बहुजन-समाज-दलेन (बी.एस्.पी.) इत्यनेन एकं स्थानम् प्राप्तम्। प्रशान्त-किशोरस्य जन-सुराज्-दलने बिहार-निर्वाचने एकमपि स्थानं न प्राप्तम्।

तत्रैव सप्त-राज्यानाम् अष्टसु निर्वाचनक्षेत्रेषु आयोजितेषु विधानसभायाः उप-निर्वाचने काङ्ग्रेस्-भाजपा दले द्वे-द्वे आसने विजितवान्तौ। आम आदमी-दलं, पी.डी.पी., मिजो-नैशनल-फ्रण्ट् दलं, जे.एम्.एम्. इत्येतत् दलं च एकं-एकं स्थानं प्राप्तवन्तः।

## भाजपेति दलस्य वरिष्ठः

भाजपेति दलस्य वरिष्ठः नेता तथा प्रधानमन्त्री नरेन्द्रमोदी, भाजपाध्यक्षः जगत् प्रकाश् नड्डाः,दलस्य वरिष्ठः नेता अमितशाहः च बिहारस्य जनान् ऐतिहासिकाभूतपूर्वाय च जनादेशाय धन्यवादं दत्तवन्तः। नवदिल्ल्याः भाजपा-मुख्यालये दलस्य सदस्यान् सम्बोधयन् प्रधानमन्त्री श्रीमोदी अवदत् यत्, बिहार-विधानसभा-निर्वाचने विजयः विकासस्य राजनीतेः अभवत् जनाः परिवारस्य राजनीतिं अस्वीकृतवन्तः। बिहारस्य मुख्यमन्त्री नितीशकुमारः एन्.डी.ए. इत्यस्य सर्वान् घटकदलान्, तेषां नेतॄन् च प्रति कृतज्ञतां प्रकटितवान्। सः अवदत् यत्, राज्यस्य जनाः राज्यविधानसभानिर्वाचने एन्.डी.ए.-पक्षाय बहुमतं दत्त्वा, संयुक्त-सर्वकारे स्वस्य विश्वासम् प्रदर्शितवन्तः।

## प्रधानमन्त्री-गुजरात यात्रा

प्रधानमन्त्री नरेन्द्रमोदी अद्य गुजरातराज्यस्य यात्रायां भविष्यति। यात्रावधौ श्रीमोदी सूरत-नगरे निर्माणाधीनं बुलेट्-रेल्-स्थानकं गत्वा मुम्बई-अहमदाबाद् द्रुत-रेल-मार्गस्य प्रगत्याः समीक्षां करिष्यति। पश्चात् प्रधानमन्त्री नर्मदा-मण्डलस्य देवमोगरा-मन्दिरे पूजार्चनां च करिष्यति। सः डेडियापाड़ा अपि गमिष्यति तथा च धरती आबा भगवान् बिरसा मुण्डा वर्यस्य सार्धैकशततमस्य जन्मदिवसस्य अवसरे आयोजिते कार्यक्रमे भागमपि ग्रहीष्यति। यात्रावधौ श्रीमोदी प्रायः सप्तशतोत्तर नवसहस्र कोटिरूप्यकाणां बहुविधविकासपरियोजनानां उद्घाटनम् अपि करिष्यति, यस्य उद्देश्यं जनजातीयसमुदायानां उत्थानम्, क्षेत्रस्य ग्रामीणक्षेत्राणां दूरस्थक्षेत्राणां च आधार भूतसंरचनासु सुधारः भविष्यति।

**॥इति वार्ताः॥**